# Jaimni Sutra's "Jyothish Pradeepika"

## Sanskrit Commentary of Lakshmana Sastry

$1^{st}$ Chapter-$1^{st}$ Quarter.

**Sampath kumar Medavarapu**

**AndhraPradesh**

I am very glad to submit the unpublished Sanskrit commentary on Jaimni Sutras, first time in public.

This Sanskrit commentary name is "JyothisPradeepika" – written by Lakshmana Sastry S/o Viswsvara Sastry, who is a staunch devotee of Lord Vaidyanatha of Vaideeswaran koil[TamilNadu].This information is given by commentator him self, at the end of palm leaf of $1^{st}$ quarter of $1^{st}$ chapter.

Firstly, the commentator wrote all aphorisms of 2 Chapters in 17 Folios, after that he started his own interpretation. All sutras are written as it is in old version form ,which are available in his time, mostly matched with "Subodhini" of Neelakantha.He edited the Sutras also.

For example- There is a Sutra – तस्य पिता 1-1-16, But he omitted this Sutra in his commentary.

Source of this Manuscript is taken from Saptarishis Astrology web site, thank to the team of SA.

At present the original Sanskrit text of $1^{st}$ Quarter of $1^{st}$ Chapter is given , with English transliteration.

Aphorisms are written in 17 folios, commentary begins in $18^{th}$ folio, So commentary starts as ....

व्याख्यान प्रारम्भः। श्री गणॆशायनमः।जयमिनि[जैमिनि] सूत्र व्याख्यानम्।दॆवता---पदं विधयॆ[?]
मतिप्रीत्यायितं मङ्गळम्।च्छन्दॊऽनुष्टुभ्।---मॊषु बुधं गुरुवरं नमस्यन्ति यम् [?] ।दैतालना वंश ---दागत
[ not clear] तमॊरूप पञ्चवर्णायै--ग्रह रूप---तमहं वन्दॆ शुभाकांक्षया।
जयमुनीय सूत्रस्य लक्ष्मणॊऽभ्यसन्धतुः---"**ज्यॊतिःप्रदीपिका**" नाम कृता---यथामतिः।
इह---जगति वॆदपुरुषनयन्स्याङ्गभूत ज्यॊतिःशास्त्र तत्त्वं, भगवता पित्राउपदिष्टम्।तथाप्यथामति ---यथा तदुपदॆशं प्राप्ता---कारुणिकॆन जयमुनिनालॊकानां तत्त्वावबॊधाय रचितॆषु ज्यॊतिःशास्त्र सूत्रॆषु उपदॆशम्।
उ=शिवसंबन्धॆन ,दॆशं,शं शङ्करतया , शमिति शिवपादाब्जस्मरण मङ्गळपूर्वकं कृतमाद्यमिदं प्रतिज्ञासूत्रं "उपदॆशं व्याख्यास्यामः"।
उपदिश्यतॆ सकलरहस्यमनॆनॆति उअपदॆशं, ज्यॊतिःशास्त्रस्य **गर्ग** कृत उपदॆशॊ वा तं व्याख्यास्यामः।
--------अस्य ग्रंथस्य द्वारा ध्यॆयॊ फलज्ञापकमायुर्यॊगश्च-
**Next Folio-**तत्राऽपि स्वीय संहिता प्रकाशः अस्मिन् संज्ञा ज्ञानादि पूर्वमूल भूतं राशिदृष्टिक्रमामाह।
अभिपश्यन्ति ऋक्षाणि।ऋक्षाणि=राशयः।अभिपश्यन्ति।अभिमुखतया पश्यन्ति।राशि चक्रॆ मॆशादिराशयः स्वस्य संमुखान् राशीन् वीक्षन्तॆत्यर्थः।यथा- मॆषॊ वृश्चिकं पश्यति।वृषभस्तुलाम्। मिथुनं कन्यामित्यादि।पार्श्वभॆ च।
पार्श्वभॆ पार्श्वराशिद्वयं च पश्यन्ति।पार्श्वभमिति संप्रदायात्। चक्रपार्श्वं यथा- मॆषः, सिंह-कुम्भ-वृश्चिकान्। वृषभः-कर्कटक तुलामकरान्।मिथुनः-कन्याचापमीनान् पश्यन्तीत्यादि [पश्यतीत्यादि]। तथा चर रशिः स्वसमीपस्थितानां राशीन् , स्थिरराशॆः दृशानॆव चरराशीन् , द्विस्वभावराशिः द्विस्वभाव राशिं पश्यति। इत्यादि।

अभिमुख पार्श्वभानीति। सूत्रैः हॊरा दृग्यॊगकरणं अभिमुख दृष्टैःप्राबल्य सूचनाय।राशिदृष्टिप्रदॆशस्तु । तैः पत्नी[1] लाभयॊः[7] दृष्टॆत्यादयः।

**Next Folio-** तदेवं सूत्राभ्याम्। राशिदृष्टिक्रममुक्त्वा ,ग्रहाणां अन्यदन्यतः सिद्धमिति वक्ष्यमाण रीत्या प्राप्तां दृष्टिक्रमप्राप्त शङ्कां निराकरोति।

तन्निष्ठाश्च तद्वत्।तं निष्ठाः राशिनिष्ठाः ग्रहाः तद्वत् अभिमुख पार्श्व राशीन् यथा यथा सम्भवं तत्र स्थितान् ग्रहांश्च वीक्ष्यन्ते। सूत्रे चकारो ग्रह समुच्चयार्थः। तन्निष्टत्वं ग्राहाणामेवेति ग्रह इति नोक्तम्।ग्रहदृष्टिप्रदेशास्तु शुभमात्रदृष्टेः।तौ पापदृष्ट्या इत्यादयः।प्राचीनैरर्गळा इति संकीर्तितान् दृष्टिफलदाः प्रकाशनार्थानाह। दार्-भाग्य-शूलस्थार्गळानिध्यातुः।कादिनवम्। टादिनवम्।पादिअपञ्च याद्यष्टौ इति संहिता। दारं। अङ्कानां वामतोगतिः इयिरीत्या अष्टाविंशति [28] द्वादशभिर्भागेन चतुर्थं[4] भाग्यम् द्वितीयम्[2]शूलमऐकादशम् [11] ऐवं स्थिताः ग्रहाः निध्यातुः=द्रष्टुः राशेः ग्रहस्य भाग्यदाः भवन्ति। उत्तर सूत्रे पापानामित्युक्तत्वात्,तत्र-

**Next Folio-**शुभां ग्रहाः ----इति केचित्।प्रदिशाश्च निराभासार्गळयेत्यादयः। तद्विशेषानाह। कामस्था तु भूयसा पापानां, पाप ग्रहाणां"रव्यार सौर----" बुधानां पापानां दृष्टानां कामस्थाः काम= तृतीय स्थिताः ग्रहाः। भूयसा विशेषेण अर्गळाः भवन्ति। साधकानुक्त्वा बाधकानाह। रिःफ नीच कामस्था विरोधिनः।रिःफम्=दशमम[10]। नीचम् द्वादशम्[11],कामम्=तृतीयम्[3] ऐषुस्थिताः ग्रहाः विरोधिनः।दिष्टफलबाधकाः इत्यर्थः।अग्रे शुक्रस्य मातृकारकःअर्गळाविरोधिनो यो बलवान् तेन दृष्टिफलस्य वृद्धिःहानिर्वा वक्तव्यः। न न्न्यूना विबलाश्च। भागन्न्यूनाश्च अर्गळा ग्रहाःबलाबल रहिताः भवन्ति।प्राग्वत्त्रिकोणे।पञ्चम-नवमयोःप्राग्वत्।अर्गळविरोधिताः भवन्ति।द्रष्टुःपञ्चमे स्थितस्य अर्गळत्वं,नवमे स्थितस्य विरोधितेत्यर्थः।विपरीतं केतोः।

**Next Folio-** केतुग्रहस्य अर्गळा विरोधित्वं विपरीतं भवति।अर्गळस्थानस्थस्य विरोधित्वं,विरोधिस्थानस्थस्य अर्गलात्वंइति भावः। आत्माधिकः कळादिभिर्नभोगःसप्तानामष्टानां वा,सप्तानां रव्यादि सप्तग्राहानां। अष्टानां राहु सहितानां वा । यः अधिको ग्रहः आत्मकारको ज्ञेयः।स ईष्टे बन्धमोक्षयोः।ग्रह संचार सूचित सुखदुःखयोः कर्तृत्वं बन्धः।तदभावे मोक्षः।उभयोरपिस कारक इष्टः[ अधीनः] अवश्यमित्यर्थः।पञ्चमूषकमार्जालाः- केतौ कैवलयं-इत्यादेःकारकादेव वक्ष्यमाणत्वादितिभावः। तस्यानु-

**Next Folio-** सरणत्वादमात्यः।तस्य----दितः योगक्षेमेत्यर्थः।शुभश्चेत्ब्शुभकर्मणि मनः करोति।पापश्चेदन्यथा।ततो भागन्न्यूनत्वं पञ्चथा तत्कारकत्वं आह। तस्यभ्रातः।तस्य माता।तस्यपुत्रः।तस्य ज्ञातिः।तस्य दारश्च।ततःततोभागन्न्यूनक्षयी इत्यर्थः।मात्रासह पुत्रमेके समामनन्ति।यो मातृकारकःस एव पुत्रस्याऽपीति काचन व्यपदीशतीत्यर्थः।

अनित्यान् कारकानुक्त्वा ,नित्यानाह।भगिन्यारतः श्यालकःकनीयान् जननी चेति।आरतः= मङ्गळात्,भगिनी श्यालः कनीयान्=कनिष्टभ्राता,जननी च वक्तव्याः।तेषां कारकः----इत्यर्थः।अग्रे शुक्रस्य मातृकारकत्वात् ------ इह जननी ।ज्ये-----------।

मातुलादयो बान्धवो मातृसजातीयं इत्युत्तरतः।कुजादुत्तरतो बुधः।मातुलादयो-----

**Next Folio-**ग्रहाणां मातृ सजातीयाः, तन्मातृभगिन्यादयो बन्धवो वक्तव्यापितामहि-पति-पुत्राविवितिगुरुमुखादेवजानीयात्।पत्नी पितरौ-श्वाशुरं मातामहेत्यन्तेवासिनः, पत्नी=कळत्रम्,पितरौ=मातपितरौ,श्वशुरौ मातामहः=मातुःपितरः, एतौ अन्तेवासिनः गुरुसमीप शुक्राद्वक्तव्या लग्नं कृत्वा तत एव तद्वादशभावफलमूह्यम्। सूत्रेषु सर्वेषु इतिकरणं .पूर्वशास्त्र----अन्य कारकत्व प्रसङ्गशंकामपहाय-----। अथ वक्ष्यमाण दशायामेवधिपं---------। मन्दो ज्यान् ग्रहेषु।अयुग्म राशिषु प्राचीवृत्तिः।प्रदक्षिणक्रमतऐव गणनेत्यर्थः।परावृत्युत्तरेषु युग्म राशिषु परावृत्या=व्युत्क्रमेणेत्यर्थ--------नाथांताः सम्ः प्रायेण।

**Next Folio-** नाथान्ताः =स्वादिपत्यक्रम राश्यन्ताः भवन्ति। प्रायेनेत्युक्तिः न्यूनभावान्तग्रह दशा वा।वयं प्रमाणेति सूचयन्ते। यावदीशाश्रयः पदं ऋक्षाणां।ऋक्षाणां=राशीनां, ईशाश्रयराशिः यावतिथः ततस्तावतिथो राशिः पदमित्युच्यते।यथा- तुलालग्ने सति दशमे शुक्रे पुनस्तद्दसमो मेष राशिःपदः। आद्येवारूढमिति प्रसिद्धः। उदाहरणात् प्रकटयति। स्वस्थे दाराः लग्नात्, स्व सङ्केतः चतुर्थः [व=4] तस्थे योगेदारा= सप्तम स्थानंपद

संज्ञा भवति।दारा इति बहुवचनोक्तिः संङ्केतो न गृह्यते।स इत्येवं विधे दारा इत्युक्त्वासम्तमुअन्त-----भवत्व द्योतनार्थः।सुतस्थे जन्म, लग्नात् सप्तमस्थे ईशे, जन्मलग्नमेव पदमित्युच्यते।लग्नस्थे तु लग्नम् इत्याद्यूह्यम्।भाव प्रसङ्गात् पूर्व-

**Next Folio-**शास्त्रेणैव भावादि संगत्याऽऽह।सर्वत्र सवर्णाभावाराशयश्च।भावात् सप्तमधनादयःसर्वत्र पूर्वशास्त्रे स्व शात्रेऽपिसमा इत्य्र्थः।यावद्विवेकमावृत्तिर्भानाम्।भानां=राशीनं,यावद् द्वादशं आवृत्तिर्गणनेत्यर्थः।विवेकः संहिता चतुश्चत्वारिंशदुत्तर शतं[144] सूत्रस्य प्रयोजनम्।राशिस्थे तदीशे गणनायां त्रयोदश संख्याव्यावृत्तिःहोरादयः निबद्धाः।होरा-द्रेक्काण-सप्तांश-नवांश-त्रिंशांशादयः, पूर्वशास्त्रे एव सिद्धाःइत्यर्थः।**पूज्य श्रीमदग्रगण्य नुत वैद्यनाथ भक्तविश्वेश्वर शास्त्रि तनूज लक्ष्मणशास्त्रि कृतायां "ज्योतिःप्रदीपिका"ख्यायांजयमुनि सूत्रवृत्ताशास्त्रसंहिताख्यः प्रथमाध्यायस्य प्रथमपादः।**

**English Transliteration of the above Text**

**vyākhyāna prārambhaḥ|** śrī gaṇeśāyanamaḥ|jayamini[jaimini] sūtra vyākhyānam|devatā---padaṃ vidhaye[?] matiprītyāyitaṃ maṅgaḷam|cchando:'nuṣṭubh|---moṣu budhaṃ guruvaraṃ namasyanti yam|daitālanā vaṃśa ---dāgata tamorūpa pañcavarṇāyai--graha rūpa---tamahaṃ vandeśubhākāṃkṣayā|

jayamunīya sūtrasya lakṣmaṇo:'bhyasandhatuḥ---"jyotiḥpradīpikā" nāma kṛtā---yathāmatiḥ|

iha---jagati vedapuruṣanayansyāṅgabhūta jyotiḥśāstra tattvaṃ, bhagavatā pitrāupadiṣṭam|tathāpyathāmati ---yathā tadupadeśaṃ prāptā---kāruṇikena jayamuninālokānāṃ tattvāvabodhāya raciteṣu jyotiḥśāstra sūtreṣu upadeśam|u=śivasaṃbandhena ,deśaṃ,śaṃ śaṅkaratayā , śamiti śivapādābjasmaraṇa maṅgaḷapūrvakaṃ kṛtamādyamidaṃ pratijñāsūtraṃ "upadeśaṃ vyākhyāsyāmaḥ"|

upadiśyate sakalarahasyamaneneti uapadeśaṃ, jyotiḥśāstrasya **garga** kṛta upadeśo vā taṃ vyākhyāsyāmaḥ|

--------asya graṃthasya dvārā dhyeyo phalajñāpakamāyuryogaśca-

**Next Folio-**tatrā:'pi svīya saṃhitā prakāśaḥ asmin saṃjñā jñānādi pūrvamūla bhūtaṃ rāśidṛṣṭikramāmāha|

abhipaśyanti ṛkṣāṇi|ṛkṣāṇi=rāśayaḥ|abhipaśyanti|abhimukhatayā paśyanti|rāśi cakre meśādirāśayaḥ svasya saṃmukhān rāśīn vīkṣantetyarthaḥ|yathā- meṣo vṛścikaṃ paśyati|vṛṣabhastulām| mithunaṃ kanyāmityādi|pārśvabhe ca| pārśvabhe pārśvarāśidvayaṃ ca paśyanti|pārśvabhamiti saṃpradāyāt| cakrapārśvaṃ yathā- meṣaḥ, siṃha-kumbha-vṛścikān| vṛṣabhaḥ-karkāṭaka tulāmakarān|mithunaḥ-kanyācāpamīnān paśyantītyādi [paśyatītyādi]| tathā cara raśiḥ svasamīpasthitānāṃ rāśīn , sthirarāśeḥ dṛśāneva cararāśīn , dvisvabhāvarāśiḥ dvisvabhāva rāśiṃ paśyati| ityādi|

abhimukha pārśvabhānīti| sūtraiḥ horā dṛgyogakaraṇaṃ abhimukha dṛṣṭaiḥprābalya sūcanāya|rāśidṛṣṭipradeśastu | taiḥ patnī[1] lābhayoḥ[7] dṛṣṭetyādayaḥ|

**Next Folio-** tadevaṃ sūtrābhyām| rāśidṛṣṭikramamuktvā ,grahāṇāṃ anyadanyataḥ siddhamiti vakṣyamāṇa rītyā prāptāṃ dṛṣṭikramaprāpta śaṅkāṃ nirākaroti|

tanniṣṭāśca tadvat|taṃ niṣṭāḥ rāśiniṣṭāḥ grahāḥ tadvat abhimukha pārśva rāśīn yathā yathā sambhavaṃ tatra sthitān grahāṃśca vīkṣyante| sūtre cakāro graha samuccayārthaḥ| tanniṣṭatvaṃ grāhāṇāmeveti graha iti noktam|grahadṛṣṭipradeśāstu śubhamātradṛṣṭeḥ|tau pāpadṛṣṭyā ityādayaḥ|prācīnairargaḷā iti saṃkīrtitān dṛṣṭiphaladāḥ prakāśanārthānāha| dār-bhāgya-śūlasthārgaḷānidhyātuḥ|kādinavam| ṭādinavam|pādiapañca yādyaṣṭau iti saṃhitā| dāraṃ| aṅkānāṃ vāmatogatiḥ iyirītyā aṣṭāviṃśati [28] dvādaśabhirbhāgena caturthaṃ[4] bhāgyam dvitīyam[2]śūlamaekādaśam [11] evaṃ sthitāḥ grahāḥ nidhyātuḥ=draṣṭuḥ rāśeḥ grahasya bhāgyadāḥ bhavanti| uttara sūtre pāpānāmityuktatvāt,tatra-

**Next Folio-**śubhāṃ grahāḥ ----iti kecit|pradiśāśca nirābhāsārgaḷayetyādayaḥ| tadviśeṣānāha| kāmasthā tu bhūyasā pāpānāṃ, pāpa grahāṇāṃ"ravyāra saura----" budhānāṃ pāpānāṃ dṛṣṭānāṃ kāmasthāḥ kāma= tṛtīya sthitāḥ grahāḥ| bhūyasā viśeṣeṇa argaḷāḥ bhavanti| sādhakānuktvā bādhakānāha| riḥpha nīca kāmasthā virodhinaḥ|riḥpham=daśamam[10]|nīcam dvādaśam[11],kāmam=tṛtīyam[3] eṣusthitāḥ grahāḥ virodhinaḥ|dṣṭiphalabādhakāḥ ityarthaḥ|agre śukrasya mātṛkārakaḥargaḷāvirodhino yo balavān tena dṛṣṭiphalasya vṛddhiḥhānirvā vaktavyaḥ| na nnyūnā vibalāśca|bhāgannyūnāśca argaḷā grahāḥbalābala rahitāḥ bhavanti|prāgvattrikoṇe|pañcama-navamayoḥprāgvat|argaḷavirodhitāḥ bhavanti|draṣṭuḥpañcame sthitasya argaḷatvaṃ,navame sthitasya virodhitetyarthaḥ|viparītaṃ ketoḥ|

**Next Folio-** ketugrahsya argaḷā virodhitvaṃ viparītaṃ bhavati|argaḷasthānasthasya virodhitvaṃ,virodhisthānasthasya argalātvaṃiti bhāvaḥ|

ātmādhikaḥ kaḷādibhirnabhogaḥsaptānāmaṣṭānāṃ vā,saptānāṃ ravyādi saptagrāhānāṃ| aṣṭānāṃ rāhu sahitānāṃ vā | yaḥ adhiko grahaḥ ātmakārako jñeyaḥ|sa īṣṭe bandhamokṣayoḥ|graha saṃcāra sūcita sukhaduḥkhayoḥ kartṛtvaṃ bandhaḥ|tadabhāve mokṣaḥ|ubhayorapisa kāraka iṣṭaḥ[ adhīnaḥ] avaśyamityarthaḥ|

pañcamūṣakamārjālāḥ- ketau kaivalayaṃ-ityādeḥkārakādeva vakṣyamāṇatvāditibhāvaḥ| tasyānu-

**Next Folio-** saraṇatvādamātyaḥ|tasya----ditaḥ yogakṣemetyarthaḥ|śubhaścetbśubhakarmaṇi manaḥ karoti|pāpaścedanyathā|tato bhāganyūnatvaṃ pañcathā tatkārakatvaṃ āha| tasyabhrātaḥ|tasya mātā|tasyaputraḥ|tasya jñātiḥ|tasya dāraśca|tataḥtatobhāganyūnakṣayī ityarthaḥ|mātrāsaha putrameke samāmananti|yo mātṛkārakaḥsa eva putrasyā:'pīti kācana vyapadīśatītyarthaḥ| anityān kārakānuktvā ,nityānāha|bhaginyārataḥ śyālakaḥkanīyān jananī ceti|ārataḥ= maṅgaḷāt,bhaginī śyālaḥ kanīyān=kaniṣṭabhrātā,jananī ca vaktavyāḥ|teṣāṃ kārakaḥ----ityarthaḥ|agre śukrasya mātṛkārakatvāt ------iha jananī |jye-----------|

mātulādayo bāndhavo mātṛsajātīyaṃ ityuttarataḥ|kujāduttarato budhaḥ|mātulādayo-----

**Next Folio**-grahāṇāṃ mātṛ sajātīyāḥ, tanmātṝbhaginyādayo bandhavo vaktavyāpitāmahi-pati-putrāvitigurumukhādevajānīyāt|patnī pitarau-śvāśuraṃ mātāmahetyantevāsinaḥ, patnī=kaḷatram,pitarau=mātapitarau,śvaśurau mātāmahaḥ=mātuḥpitaraḥ, etau antevāsinaḥ gurusamīpa śukrādvaktavyā

lagnaṃ kṛtvā tata eva tadvādaśabhāvaphalamūhyam|sūtreṣu sarveṣu itikaraṇaṃ .pūrvaśāstra----anya kārakatva prasaṅgaśaṃkāmapahāya-----| atha vakṣyamāṇa daśāyāmevadhipaṃ---------| mando jyān graheṣu|ayugma rāśiṣu prācīvṛttiḥ|pradakṣiṇakramataeva gaṇanetyarthaḥ|parāvṛtyuttareṣu yugma rāśiṣu parāvṛtyā=vyutkrameṇetyartha--------nāthāṃtāḥ samḥ prāyeṇa|

**Next Folio-** nāthāntāḥ =svādipatyakrama rāśyntāḥ bhavanti| prāyenetyuktiḥ nyūnabhāvāntagraha daśā vā|vayaṃ pramāṇeti sūcayante|

yāvadīśāśrayaḥ padaṃ ṛkṣāṇāṃ|ṛkṣāṇāṃ=rāśīnāṃ, īśāśrayarāśiḥ yāvatithaḥ tatastāvatitho rāśiḥ padamityucyate|yathā- tulālagne sati daśame śukre punastaddasamo meṣa rāśiḥpadaḥ| ādyaivārūḍhamiti prasiddhaḥ|udāharaṇāt prakaṭayati| svasthe dārāḥ lagnāt, sva saṅketaḥ caturthaḥ [va=4] tasthe yogedārā= saptama sthānaṃpada saṃjñā bhavati|dārā iti bahuvacanoktiḥ saṃṅketo na gṛhyate|sa ityevaṃ vidhe dārā ityuktvāsamtamuanta-----bhavatva dyotanārthaḥ|sutasthe janma, lagnāt saptamasthe īśe, janmalagnameva padamityucyate|lagnasthe tu lagnam ityādyūhyam|bhāva prasaṅgāt pūrva-

**Next Folio-**śāstreṇaiva bhāvādi saṃgatyā:':'ha| sarvatra savarṇābhāvārāśayaśca|bhāvāt saptamadhanādayaḥsarvatra pūrvaśāstre sva śātre:'pisamā ityrthaḥ|yāvadvivekamāvṛttirbhānām|bhānāṃ=rāśīnaṃ,yāvad dvādaśaṃ āvṛttirgaṇanetyarthaḥ|vivekaḥ saṃhitā catuścatvāriṃśaduttara śataṃ[144] sūtrasya prayojanam|rāśisthe tadīśe gaṇanāyāṃ trayodaśa saṃkhyāvyāvṛttiḥhorādayaḥ nibaddhāḥ|horā-drekkāṇa-saptāṃśa-navāṃśa-triṃśāṃśādayaḥ, pūrvaśāstre eva siddhāḥityarthaḥ|**pūjya śrīmadagragaṇya nuta vaidyanātha bhaktaviśveśvara śāstri tanūja lakṣmaṇaśāstri kṛtāyāṃ "jyotiḥpradīpikā"khyāyāṃjayamuni sūtravṛttāśāstrasaṃhitākhyaḥ prathamādhyāyasya prathamapādaḥ|**